।। श्रीयेशुदेवचरितसंक्षेपः।।

निखिलजनार्तिकरे हेरदासनृपे सति शासति भूमितले
तदनुसरत्भटघोषनिनादविकम्पितदिङ्मुखसङ्कुलिते ।
निजपितरावतिदूरसुशान्तिकरं प्रति यास्यतावेव विभो
जय जय येशुमहेश्वर चिन्मय निर्मलसुखकर पावय मां ।। १

कतिपयदिवसगतेष्वथ तौ बेथलेहम नामपुरं प्रथितम्
समुपगतावतिदीर्घप्रयाणजक्षीणितस्विन्नतनूं जननीं।
अनुपमगर्भरेण च तां खलु वीक्ष्य तु ते जनकोf पि तदा
स तु रजनीमयि नेतुमहो कृतनिश्चितधीरभवत् सुमतिः।। २

अमरपतीशदिगम्बरतारकभूषितगगनतले विमले
देवकुलोद्भवललगणास्त्वथ शान्तिदगीतरतासु निशि।
लोकविशुद्धिकरो जनपापविमुक्तिकरो भगवन्नथ त्व-
माविरभूविथ लोकसुखाय परस्य सुतो खलु गोनिलये ।। ३

भुवनतलेप्यथ मङ्गलशान्तिसमीरणतुष्टमनाः मनुजाः
तव जननीजनकौ परमाद्भुतहर्षविशुद्धिपरौ सुखिनौ ।
तवपददर्शनकांक्षितपुण्यजने समुपास्यति ते निरतं
अनुपमहर्षपराः समजायत देव जयेश परेशसुत।। ४

अथ खलु देव महान् प्रथितो भुवने स तु योहननामधरः
तवजननात्परमागतवान् भवते कृतवानभिषेकक्रियाः।।
जगदवनाय विशुद्धमतिर्जनकोf थ शशास सुतं खलु त्वां
विमलविशुद्धिकरान् जनधर्मपरान् सकलान्स्मृतिशास्त्रगणान्।। ५

अथ खलु त्वान्तुपरीक्षितुमागतवान् कुमतिः स पिशाचवपुः
त्रिविधपरीक्षणशेषमहो जयिनं स मुमोच बताद्भुतभीः।
विमलमतौ गुणधामनि योहने बन्धिते त्वं भगवन्नुदधि-
वलयविभूषित कफर्नफरं पुरमागतवान् जनशान्तिकरः।। ६

अथ गलीलापुरमेत्य विभो कृतवान् हि भवान् विविधाद्भुतदान्
अनितरकर्मगणान् सुतरां परितोषकरान् जनतापहरान्।
नयनरहितनरमद्भुतकर्मकरो कृतवान् शुभदृष्टियुतम्
मृतमपि त्वं पुनःजीवमकारि च पङ्गुमहो चलने कुशलम्।। ७

अथ तव शिष्यगणेष्वुदधौ गतवत्सु विभो बहुशब्दयुत-
स्तरुवरपातिसधूलिकृतोन्नतवीचिकरे पवने च विभो।
अतिजवं वात्यतिधीरमतिस्त्वमवोचः किमु ननु भीः मनुजाः
भवजलधेरपि तारणदक्षमहं ननु वोस्त्विवति भो कलय ।। ८

क्वचिदथ मीनद्वयेन च मण्डकपञ्चभिरेव च भो भगवन्
परसहस्रानन्नुयायिजनान् नु बुभोजिथ त्वं ततः तै प्रणुतः।
अथ कुलटां पुरमग्दलवासवतीं च मुमोचिथ दण्डविधेः
तव कीयतीः कियतीः विविधाद्भुतकर्मगणाः भुवने प्रथिताः।। ९

क्वचिदथ कुष्ठगदेन तु पीडितमेकमहो सुखिनं कृतवान्
ज्वरगदतप्तवतीं महिलां कृतवाञ्ज्वरतोप्ययि तद्वियुताम्।
इति विदिताः अवनीतलवासिजनाः भवतापहरे च परे
त्वयि निहितात्मरताः विरताश्च बभूव कुघर्मपथः सततम्।। १०

कुटिलमतीन् जनतापकरानतिक्रूरतरान् कपटार्चयुतान्
त्वमथ च देव सुदूरमहो निलयात्कृतवान् बहिःनिस्सरणे ।
अथ बत ते पिलतोसमुपेत्य न्यवेदयन् नन्वपराधिरिति
तव हह दण्डनमेव च कारयितुं खलु ते कृतयत्नपराः ।। ११

स तु अपराधवियुक्तमपि त्वयि दण्डमदात्  कलुषीकृतधीः
क्रूशितसंहननं समदात् तव वैरिजनान् परितोषयितुमम् ।
अतिदयनीयतरं हननं तव कर्तुमहो यततां कुधियां
दुरितगणानपि क्षन्तुमहो पितरं प्रति याचितवान् च भवान् ।। १२

अथ त्रिदिनेषु गतेषु विभो खलु मृत्युमुखात् बहिरागतवान्
भुवनतले विचचार स्वशिष्यगणैरतुलैः समबुद्धियुतैः।
अथ विमलं नवधर्ममहो भुवनत्रितये तु शशास विभो
स च मम तापहरो भगवान् भवते कलयामि इदं प्रणतिम् ।। १३

इत्येवं येशुदेवस्य परमाद्भुतकर्मणः।
पावनं चरितं संक्षिप्यवोचं लोकतुष्टये ।। १४
यो नरो भक्तियुक्तो हि कीर्तयेत्  विमलात्मधीः।
स नरः सर्वपापेभ्यो विमुक्तश्च भवेत् ध्रुवम्  ।। १५

**Written by – Sankaranarayanan.A, HSST( Sanskrit)**
**Govt.Sanskrit. HSS. Thripunithura**
**Phone – 9744780455 E Mail ID – sankarjikodakara@gmail.com**

**HAPPY X MAS**
**AND**
**MERRY NEW YEAR**